International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 147-149
© 2026 IJMH
www.themultijournal.com
Received: 26-05-2026
Accepted: 22-06-2026
Publish : 23-06-2026

**प्रो. शीतला प्रसाद शुक्ल**
पुराणविद्या पीठ प्रमुख,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-विश्वविद्यालय,नई दिल्ली-16

**Correspondence:**
**प्रो. शीतला प्रसाद शुक्ल**
पुराणविद्या पीठ प्रमुख,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-विश्वविद्यालय,नई दिल्ली-16

# ।। अद्वैतवेदान्ते साक्षिचैतन्यविमर्शः ।।

**प्रो. शीतला प्रसाद शुक्ल**

**सारः-** साक्षीचैतन्यमात्रं निर्गुणं निष्क्रियं शुद्धं केवलं प्रत्यगात्मेति कथ्यते। साक्षी इत्यक्ते साक्षात् द्रष्टा, यः कर्ता न भवति अपितु सर्वस्य अनुभवस्य साक्षात्कारं करोति, स एव साक्षी। आत्मा शरीरे अस्मिन् साक्षीरूपेण सर्वत्र वर्तते, यथा प्रदीपः सन् गृहस्य सर्ववस्तून् प्रकाशयति, परन्तु स्वयं किमपि न करोति तद्वत आत्मा साक्षीरूपेण सर्ववृत्तीनां ज्ञानं करोति तथा निर्विकारस्वरूपेण असंगत्वेन वा तिष्ठति।

**कूटशब्दाः-** साक्षिः, कर्तृत्वं, भोक्तृत्वं, चैतन्यम्, जीवः, ब्रह्म, ईश्वरः, कूटस्थः, अधिष्ठानम्, निर्विकारः, अवच्छेदकः, असंगः, अविद्या, माया, प्रतिबिम्बः, उपाधिः, विशेषणं, अन्तःकरणं, उपहितं,

**मुख्यविषयः-**

अद्वैतवेदान्ते ब्रह्म, ईश्वरः, साक्षी, जीव इत्यादयो वर्ण्यन्ते। अत्र विचार्यते यत् 'कोऽयं साक्षी? किमसौ जीवातिरिक्तो जीव एव? अथवा ईश्वरातिरिक्त ईश्वर एव? आहोस्वित् ब्रह्मातिरिक्त ब्रह्म एव? साक्षात् ईक्षणात् साक्षी। साक्षात् पदात् द्रष्टरि- अर्थे इति प्रत्ययः द्रष्टरि संज्ञायाम्' इति सूत्रानुसारं साक्षी अर्थात् द्रष्टा दर्शनकर्ता। साक्षात् ईक्षणम् अपरोक्षतया द्रष्टत्वात्।

अस्य तात्पर्यं किमित्यस्मिन् सन्दर्भे उच्यते- **"देहद्वयाधिष्ठानभूतं(स्थूलसूक्ष्मं) कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षात् ईक्षणात् निर्विकारत्वात् च साक्षीत्युच्यते**[1]।" द्रष्टृत्वं(दृष्टिक्रियाकर्तृत्वं) निर्विकारत्वं(कर्तृत्वादिविकारराहित्यं) इत्यनयोः परस्परविरोधो न कल्प्यते। दृष्टिस्वरूपे एव कूटस्थे तत्कर्तृत्वस्य साक्षात्द्रष्टरि संज्ञायाम् इति सूत्रानुसारमुभयोः समन्वयात्। एवमेव सामाजिकाः अपि उदासीनस्वभावात्मकमेव साक्षित्वं प्रतिपादयन्ति। अस्य तात्पर्यमिदं वर्तते यत् साक्षिणि कर्तृत्वम् आरोप्यते नतु वास्तविकम्।

प्रकाशात्मकेऽकर्तरि सवितरि यथा सविता प्रकाशते इति प्रकाशकर्तृत्वमारोप्यते। तथैव दृशिस्वरूपे साक्षिणि द्रष्टृत्वं(दर्शनकर्तृत्वं) आरोप्यते। वस्तुतः साक्षी अकर्ताभोक्तोदासीनश्च वर्तते। सः कूटस्थः कथ्यते। कूटे अर्थात् मिथ्या बुद्धौ(चिदाभासे) निर्विकाररूपेण(असंगरूपेण) यत् चैतन्यमवतिष्ठते तदैव कथ्यते कूटस्थ इति। सैव साक्षी स्वप्रकाशः साक्षी स्थूलसूक्ष्मशरीरञ्च प्रकाशयति।

अन्तःकरणस्य जडात्मकत्वात् अन्तःकरणवृत्तिरपि जडात्मिका, अतः तया वृत्त्या स्थूल-सूक्ष्मशरीरयोरवभासो न शक्यते। तस्मात् जीवस्य स्थूलसूक्ष्मशरीरयोरवभासार्थं साक्षी स्वीक्रियते। अन्तःकरणम्, अन्तःकरणवृत्तिः, अन्तःकरणधर्मभूतसुखदुःखादिकञ्च साक्षिण एव विषयो नान्तःकर-णवृत्तेः, नापि इन्द्रियाणाम्। अन्तःकरणवृत्तेः साक्षिविषयत्वात् सा स्वयमपि साक्षी चैतन्यप्रकाशेन प्रकाशिता। अतः अन्तःकरणवृत्तेः भासकोऽपि साक्षीति अभ्युपगम्यते।

**साक्षिणः जीवात् भिन्नत्वाभिन्नत्वविचारः -** साक्षी जीवाद्भिन्नः। जीवस्य उदासीनत्वाभावात्। जीवस्य साक्षित्वनिरासो विभिन्नाचार्यैः उपपाद्यते। पञ्चदश्यां – **"यः साक्षी जीवाद्भेदेन दर्शितः इति**[2]।" अद्वैतसिद्धौ- **"जीवात् विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि किन्तु अस्पृष्टजीवेश्वरविभागं चैतन्यमिति**[3]।"

केचन् वेदान्तिनो जीवकोटौ साक्षिणः अन्तर्भावः कर्तुमिच्छन्ति। तेषां मतं वर्तते यत् अध्यासेन एकस्य वस्तुनो धर्माः अन्यस्मिन् संक्रमन्ते। यथा 'इदं रजतमिति' भ्रमज्ञाने शुक्तिगतः इदन्तारूपधर्मः रजते अवभासते। तथैव जीवाभिन्नजीवाधिष्ठानपरमेश्वरस्य साक्षित्वमपि जीवे प्रतिभासते। एवं रूपेण केचन् वेदान्तिनः सुखदुःखाज्ञानादीनां साक्षात् द्रष्टुः अविद्योपाधिकजीवस्यैव साक्षित्वमुपपादयन्ति।

कर्तृभोक्तृरूपजीवस्य उदासीनसाक्षित्वं कथं भवति? अस्मिन् सन्दर्भे उच्यते जीवः स्वरूपतः असंगो-दासीनश्च वर्तते। जीवस्य कर्तृत्वभोक्तृत्वादिकमन्तःकरणजीवचैतन्ययोः तादात्म्याध्यासेनैव जीवे

आरोप्येते। आरोपः मिथ्या। अतः जीवस्य कर्तृत्वभोक्तृत्वादिकमपि मिथ्या। अतः जीवस्य असंगत्वमुदासीनत्वञ्च समीचीनमेव। तदा च तस्य साक्षित्वं सत्यम्।

केचन् वेदान्तिनः "अन्तःकरणोपाधिकजीवस्य साक्षित्वं प्रतिपादयन्ति। न अविद्योपहितजीवस्य। सिद्धान्तलेशसंग्रहे उच्यते यत् अन्तःकरणोपहितत्वेन जीवः साक्षी। तथा प्रतिपुरुषं साक्षिभेदात् पुरुषान्तःकरणादेः पुरुषान्तरसाक्षिसंसर्गात् वा तदयोग्यत्वात् वा अप्रकाशः उपपद्यते[4]"। अन्तःकरणविशेषणत्वेन चैतन्यस्य प्रमातृत्वं भवति। तथा अन्तःकरणस्योपाधित्वेन चैतन्यस्य साक्षित्वम् उपपद्यते।

**साक्षिणः ईश्वराद्भिन्नत्वाभिन्नत्वविचारः -** "साक्षी ईश्वरात् भिन्नो वर्तते। यतः सृष्टिस्थितिलयकर्ता ईश्वरः उदासीनः इति वक्तुं न शक्यते। शुद्धचैतन्यमेव साक्षी भवितुं शक्नोति[5]।" "केचन् वेदान्तिनः एवं कथयन्ति यत् ईश्वरस्य असौ रूपभेदो जीवप्रवृत्तिनिवृत्योः अनुमन्ता सन् स्वयमुदासीनो वर्तते। अतः सः साक्षी इति कथ्यते[6]"। एवमेव श्वेताश्वतरोपनिषदि ईश्वरस्य साक्षित्वं प्रतिपादयन् उच्यते **"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च[7]।"** ईश्वर एव साक्षीति अस्मिन् विषये कथ्यते सुषुप्तौ इन्द्रियाणां बुद्धिवृत्तेश्च उपरमे सति जीवगतव्यष्ट्याज्ञानस्य भासकोऽयम् ईश्वरसाक्षी जीवेन सह अभिन्नः सन् प्राज्ञ इति कथ्यते। अतः उदासीनपरमेश्वर एव साक्षीति ईश्वरकोटौ साक्षी अन्तर्भवति।

**साक्षिणो द्वैविध्यं। जीवसाक्षी ईश्वरसाक्षी च।**

**जीवसाक्षी -** अन्तःकरणावच्छिन्नचैतन्यम् अन्तःकरणतादात्म्यापन्नचैतन्यं वा जीवः उच्यते। अज्ञानतादात्म्यापन्नचैतन्यं यथान्तःकरणेन तादात्म्यमापद्यते तथा तदन्तःकरणावच्छिन्नान्तःकरणानुप्रविष्टचैतन्यं जीव इति व्यपदिश्यते इति वाचस्पतिमिश्रः।

विवरणे तु **"अविद्याप्रतिबिम्बितचैतन्यमेव जीवः। तदैव विवरणे ब्रह्मैव अविद्याप्रतिबिम्बितम् इति निरूप्यते। प्रतीयमानकर्तृत्वादिनिर्वाहाय यथान्तःकरणावच्छिन्नचैतन्यरूपजीवः पृथक् अंगीकर्तव्यः तथा ज्ञानसुखादिविषयप्रकाशनिर्वाहाय जीवसाक्षी अपि[8]।"**

अत्र संशयो जायते यत् एकमेव अन्तःकरणं, जीवचैतन्यं यथा व्यावर्तयति तथैव साक्षिणमपि व्यावर्तयति इति कथं जीवसाक्षिणोः प्रभेदः। अस्य समाधानमेवं वक्तुं शक्यते यत् अन्तःकरणं साक्षिचैतन्यस्योपाधिः। परन्तु जीवचैतन्यस्य विशेषणम्। अन्तःकरणोपहितचैतन्यं साक्षी। अन्तःकरणविशिष्टचैतन्यं जीवः।

उपाधेः स्वरूपं लक्षयति यद् वस्तु धर्मे वा स्वयं पृथगत्वेन वर्तमानं सत् स्वस्थानावस्थितं वस्त्वन्तरं ज्ञापयति स उपाधिः। "परिभाषायां कथ्यते **उपाधिस्तु कार्यानन्वयी व्यावर्तको वर्तमानश्चे**ति अस्य विपरीतं **विशेषणं तद्भवति यद् कार्यान्वयी व्यावर्तकं वर्तमानञ्च[9]"** अन्तःकरणसबलितं चैतन्यं कर्ताभोक्तासंसारीजीवेति कथ्यते। एवमन्तःकरणं कर्तृरूपजीवचैतन्यस्य विशेषणम्। विशेषणं तु विशिष्टमनुगच्छति परन्तु उपाधिः उपहितं न अनुगच्छति। जीवे अन्तःकरणस्य प्रवेशो वर्तते। साक्षिणि तु प्रवेशो न वर्तते। जीवः इति अन्तःकरणसहितचैतन्यस्य संज्ञा। एवंरूपेण साक्षिणि उदासीनत्वात् रागद्वेषादिकं न भवति। परन्तु जीवे भवति।

श्रुतिरपि कर्मफलभोक्ताजीवात् पृथग्भूतः साक्षी वर्तते इति प्रमाणीकरोति। तदैवोच्यते **"तयोरन्यः पिप्पलं स्वाद्वन्ति अनशन् अन्योऽभिचाकशीति[10]।"** साक्षिचैतन्यं सुषुप्ति अवस्थायां निर्विषयं सत् स्वयं भासते। परन्तु प्रबोधावस्थायां जीवस्य अन्तःकरणेन्द्रियादिकं भासयति।

**"सर्वं वस्तु ज्ञाताज्ञाताभ्यां साक्षिचैतन्यस्य विषयः[11]"** अन्तःकरणस्य जडत्वात् विषयभासकत्वायोगात् विषयभासचैतन्योपाधित्वं जीवसाक्षी, प्रतिशरीरं नाना। यद्यपि साक्षिचैतन्यमेकं तथापि भेदकस्य तदुपाधिभूतान्तःकरणस्य प्रतिशरीरं भेदात् तदुपाधेः साक्षिचैतन्यस्यापि भेदः कल्प्यते।

**ईश्वरसाक्षी -** भामतीप्रस्थाने मायावच्छिन्नचैतन्यमीश्वरः इति कथ्यते। परन्तु विवरणप्रस्थाने मायोपहितचैतन्यमीश्वरः इति उपपाद्यते। विवरणप्रस्थाने मायाविद्ययोः भेदो न वर्तते। अतः मायोपहितमित्यस्य तात्पर्यम् अविद्योपहितम् इत्यपि भवितुं शक्यते। भामतीप्रस्थाने तु मायाविद्ययोः भेदः स्वीक्रियते। अतः मायोपहितमित्यस्य तात्पर्यं विशुद्धसत्वप्रधानोपहितमित्येव वरम्। मायाविद्ययोर्भेदः पञ्चदश्यां वर्ण्यते यत् सत्वरजतमगुणयुक्ता द्विविधा च सा। सत्वशुद्धविशुद्धिभ्यां मायाऽविद्या च ते मते।

एवं रूपेण ईश्वरसाक्षिचैतन्यमेकं तदुपाधिभूतमायायाः एकत्वात् ईश्वरचैतन्यस्य अनादित्वात् ईश्वरसाक्ष्युपाधिः मायापि अनादिः वर्तते। मायायाः विशेषणत्वेन ईश्वरत्वं। मायोपाधित्वेन च साक्षित्वम् इति उभयोर्भेदः।

अत्र संशयो भवति यत् विशेषणोपाधिभ्याञ्च धर्मभेदात् धर्मिणोः ईश्वरसाक्षिणोः भेदः प्रसज्यते? अस्य समाधानं वर्तते यत् धर्मभेदः धर्मिभेदे कारणं न भवति। यथा एकैव देवदत्तः पाचकत्वपाठकत्वधर्माभ्यां देवदत्तत्वं न जहाति। तथैव मायोपाधिभ्यां धर्मभेदेऽपि धर्मिणः चैतन्यस्य ईश्वरत्वसाक्षित्वाभ्यां धर्मभेदेऽपि एकत्वं न जहाति। विरुद्धधर्म एव धर्मिभेदको न तु अविरुद्ध इति।

**असङ्गात्मनः साक्षित्वं -** ईश्वरजीवयोर्मध्ये चैतन्यस्यैका विशिष्टावस्था वर्तते। या असंगत्वात् निष्क्रिया वर्तते। सक्रियत्वात् जीवस्य सर्वाणि कार्याणि अवभासयति। एवंरूपेण साक्षित्वेन ज्ञायमानस्यावस्था ईश्वरस्य एकं विशिष्टरूपं भवति। ईश्वरतत्वस्य द्वौ पक्षौ जगतः सृष्ट्यादिकर्ता तथा कर्मफलाविधानकर्ता। कर्मफलविधानाय एव ईश्वरः साक्षित्वेन ज्ञायते। शारीरकभाष्ये प्रतिपाद्यते यत् **"अहं प्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानें सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषुअध्यस्यति[12]"** रत्नप्रभाकारेण अस्य तात्पर्यमेवं विहितं यत् **"यस्य प्रत्यक्त्वं ज्ञातं नास्ति सा अत्मा साक्षी यथा अज्ञानप्रतायक्त्रूपे साक्षिणि[13]।"**

"संसारी आत्मा जीवोऽपि कर्तृत्वभोक्तृत्वयोः साक्षी न वर्तते। अतः परमतत्वमज्ञानावभासेन द्रष्टा(दर्शनदृश्यादीनाम्) साक्षी जायते। अतः कूटस्थासंगात्मा अज्ञानोपहितरूपेण साक्षीपदेन बोध्यते[14]"।

International Journal of Multidisciplinary Horizon/ Volume 03/Issue 03/ May-June 2026/Page No. 147-149 https://themultijournal.com/

**"प्रत्यगरूपस्य स्थास्नुत्वाज्ज्ञातुमूर्हिति चान्वयात्।**

**कूटस्थस्यापि साक्षित्वमाणमापायिनं प्रति।।"**

साक्षी स्वसिद्धये अन्यं साक्षिणं न अपेक्षते। तस्य साक्षित्वन्तु स्वतः सिद्धं। चिदात्मा यथा सर्वेषां पदार्थानां प्रकाशको भवति। तथैव तेषां द्रष्टापि भवति। लौकिकं ज्ञानं प्रमेयप्रमाताप्रमाणानि अपि विषयत्वरूपेणाश्रयति। परन्तु साक्षिज्ञानस्य विषयोऽपि न वर्तते।

**"प्रमाणानि पराक प्रवणानि, न तु प्रत्यक् प्रवणानि।"**

संक्षेपशारीरकेऽपि साक्षिस्वरूपविषये उच्यते यत्

**"तमसा विनिर्मितमिदं सकलम्। चतुरः स पश्यति परः पुरुषः।।**

**अविकारिबोधवपुरद्रयकः। कारणैर्विना सकलसाक्षितया[15]।"**

अन्यदप्युक्तं यत् परमपुरुषः शुद्धचैतन्यं ब्रह्म स्वाश्रयतया मायोपहितः सन् स्वस्मिन्नैव कल्पितं सर्वं प्रपञ्चं प्रपंचकारणम् अविद्यावृत्तौ स्वीयाभासेन प्रकाशयन् साक्षीत्युच्यते। यथा

**"निजमायायाः परिगतः पुरुषः परतन्त्रया तु निजया प्रभया।**

**परिजल्पितं सकलमाकलयन् स हि साक्षितामुपगतो भवति[16]।"**

चितसुखाचार्यः वदन्ति यत्, चिद्रूपात्मैव साक्षिपदार्थानां सम्बन्धेन साक्षीत्युच्यते। असौ साक्षी अविद्याविशिष्टो नास्ति। यथा "**मानस-प्रत्यक्षवेदयत्वे इच्छादेः कर्मकर्तृभावस्य एव साधकत्वात्। नच स्वरूपमात्रेण ग्राहकस्य विशिष्टरूपेण ग्राहकत्वे अप्यविरोधः केवल-स्य देवदत्तस्य गन्तृत्वं कुण्डविशिष्टस्य तु गन्तव्यत्वमिति तत्रापि विरोधाभावप्रसंगात्**[17]"

**निष्कर्षः-** एवं रूपेण वक्तुं शक्यते यत् सर्वेषां प्रत्यगभूतं विशुद्धं ब्रह्मैव जीवतादात्म्यापन्नत्वेन साक्षीति कथ्यते। साक्षात् चिन्मात्रत्वे सत्यपि साक्षीभावो जीवभावे अन्तर्भवति।यथा "**तस्मात् सर्वप्रत्यग्भूतं विशुद्धं ब्रह्ममात्रं जीवाभेदेन साक्षीति प्रतिपाद्यते**[18]" तस्मात् कारणात् परमात्मनः शुद्धस्वरूपस्य विवरणं साक्षिपदेनैव अवगन्तुं शक्यते।

**सन्दर्भग्रन्थसूची**


1. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुरम् (सं-2075)
2. उपनिषत्संग्रहः, पं. जगदीशशास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1998
3. ब्रह्मसूत्रशाङ्करभाष्यम्, (सत्यानन्दीटीका) सत्यानन्दसरस्वती गोविन्दमठ वाराणसी, 1992
4. ब्रह्मसूत्रशाङ्करभाष्यम्, (रत्नप्रभासहिता) शङ्कराचार्यः, सं. पं. श्रीपण्डीप्रसादशुक्लः, पं. श्रीकृष्णपन्तशास्त्री, भाषानुवादकः - भोलेबाबा, 1993
5. ब्रह्मसूत्रशाङ्करभाष्यम्, (भामती) वाचस्पतिमिश्रः चौखम्बा विद्याभवनम्, 2014
6. बृहदारण्यकोपनिषद्, गीताप्रेस गोरखपुर सं.-2071
7. वेदान्तपरिभाषा, समणिप्रभा शिखामणिसहिता, प्रो. पारस-नाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1984
8. वेदान्तसारः, प्रो. राममूर्तिशर्मा, ईस्टर्न बुक लिंकर्स, 1989
9. सिद्धान्तलेशसंग्रहः, पं. श्रीमूलशङ्करव्यास, चौखम्बा विद्या-भवन, वाराणसी, 2007
10. तत्त्वप्रदीपिका (चित्सुखी), स्वामियोगीन्द्रानन्द, चौखम्बा विद्याभवन, वाराणसी, 2005
11. पञ्चदशी, नारायणराम आचार्य, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2015
12. सङ्क्षेपशारीरकम्, स्वामियोगीन्द्रानन्द, चौखम्बा विद्याभवन, वाराणसी, 1989
13. पञ्चपादिका पञ्चपादिकाविवरणम् च, मद्रास सरकार ओरिएंटल सिरीज, 1958
14. बृहदारण्यकोपनिषद्भाष्यवार्तिकम्, काशीराम शास्त्री, आनन्दा-श्रममुद्रणालय,1892


**सन्दर्भ**

1. सि. ले. सं. (पृ. 234)
2. पञ्चदशी नाटकदीपे (पृ.359)
3. अ. सि. (पृ. 609)
4. सि. ले. सं. (पृ. 235)
5. सि. ले. सं. – "एवं जीवात् विवेचितः अयं साक्षी न ब्रह्मकोटिरपि। इति कूटस्थदीपे।"
6. वे,सा.- ईश्वरस्य रूपभेदोऽसौ कारणत्वादिवर्जितः।
7. श्वे.उ3.6.11.
8. वे. प. (पृ. 72)
9. वे. प. (पृ 72)
10. मु. उ. 3.1.1
11. प. पा. विवरण पृ. 83
12. साक्षाद्द्रष्टरि संज्ञायां 5-2-91
13. रत्नप्रभा पृ. – 54
14. बृ. भा. वा. 1-4-1 (पृ. 372-380)
15. सं. शा. -2/29
16. सं. शा. – 2/30
17. तत्वप्रदिपिका (पृ. 588)
18. त. प्र. (पृ. 589)